International Journal of Sanskrit Research 2018; 4(5): 131-133

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 131-133
© 2018 IJSR
www.anantaajournal.com
Received: 27-07-2018
Accepted: 28-08-2018

**सुषमा**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेश,
भारत

**Correspondence**
**सुषमा**
शोधच्छात्रा साहित्यविभागः
वेदव्यासपरिसरः, हिमाचलप्रदेश,
भारत

# व्याकरणेऽर्थमाहात्म्यम्

**सुषमा**

**प्रस्तावना**

साधुशब्दानामनुशासकं शास्त्रं व्याकरणं नाम। ज्ञानविज्ञानोपलब्धये पारस्परिकलोकव्यवहाराय च शब्दसाधुत्वमनिवार्यम्। शास्त्रेऽस्मिन् शब्दानां पदानां वा व्याक्रिया प्राधान्येन निर्दिश्यते। वाक्यमत्र गौणीभूतं तिष्ठति। अत एव व्याकरणस्य कृते पदशब्दस्य प्रयोगः संगतो भवति। प्रकृति–प्रत्यय–विभागपरिकल्पनया सामान्यविशेषवता लक्षणेन च व्याकृतस्य पदस्य अर्थज्ञानं ततश्च तस्य साधुप्रयोग एव व्याकरणस्य मुख्यं फलम्। यथा महाभाष्ये प्रोक्तम्–

यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः [1]।।

पाणिनीयव्याकरणस्य पठनपाठनपरम्परायां सम्प्रति प्रक्रियापूर्वकं पदसिद्धिरेव मुख्यत्वमावहति। परं व्याकृतस्य पदस्य कोऽर्थः कथं वा तस्य वाक्ये प्रयोग इत्येतदर्वाचीनवैय्याकरणपरम्परायां प्रायेणोपेक्ष्यमाणं गुणीभूतं वा जातम्। परिपूर्णतायै व्याकरणस्य सिद्धिप्रक्रियया सहैव उदाहरणार्थानां ज्ञानं प्रयोगविषयकं ज्ञानञ्च परमावश्यकम्। व्याकरणप्रक्रियां सरसरीत्या शिक्षयितुं व्याकृतानां पदानां प्रयोगाभ्यासं च कारयितुं प्राचीनकालत एव व्याकरणोदाहरणसमापनीयानां [2] काव्यानां रचनायाः परम्परा विद्यते। परम्परेयं खलु प्राचीनकाले विपुलसङ्ख्यैरीदृशैः काव्यरत्नैः सुतरां सम्पन्नाभूत्।
उदाहरणकाव्यानामेतेषां श्रवणरमणीयानि सहृदयहारीणि पद्यानि यत्र तत्र प्रकीर्णमणिरूपेण विद्वज्जनलोचनगोचराणि सन्ति बलादिवावर्जयन्ति सचेतसां चेतांसि। यथा–

स्तोष्याम्यहं पादिकमौदवाहिं ततः श्वभूते शातनीं पातनीं च।
नेतारावागच्छतां धारणिं रावणिं च ततः पश्चात् स्रंस्यते ध्वंस्यते च [3]।।

'अचः परस्मिन् पूर्वविधौ' [4] इति सूत्रस्य प्रयोजननिदर्शकानि पादिक–औदवाहि–शातनी–पातनी–धारणि–रावणीति नामानि दर्शितानि। स्रंस्यते ध्वंस्यते इति क्रियाद्वयं च दर्शितम्। कानि पुनरस्य योगस्य प्रयोजनानीति पर्यनुयोगे महाभाष्यकारः पद्यमेतदुद्धृतवान्।
महाभाष्ये पस्पशायां सूत्राणामुदाहरणानामवबोधने एव व्याकरणस्य पूर्णता दर्शिता। अत्र महर्षिः पतंजलिः लक्ष्यलक्षणे व्याकरणम् इति कात्यायनमुनेः वचनं व्याख्याति–लक्ष्यं च लक्षणं चैतत् समुदितं व्याकरणं भवति [5]। अनेन ज्ञायते यत् न केवलं सूत्रमेव व्याकरणमपितु सूत्रैः सह उदाहरणानामर्थावगमनमपि व्याकरणाध्ययनस्यानिवार्यो भागोऽस्ति। किं बहुना? प्रक्रियानुसारेण शब्दनिष्पत्तौ सत्यामपि यावदुदाहरणानामर्थाः नावबुध्यन्ते तेषां प्रयोगश्च नावगम्यते तावद् अपूर्णमिदं व्याकरणाध्ययनं तत् फलमपि च कदाचिदवाप्यते।
एतेषु वैयाकरणशिरोमणि–महाकविभट्टिप्रणीतं रावणवधं नाम भट्टिकाव्यम्, व्याकरणार्णव– कर्णधारेण महाकविना भूमभट्टेन रचितम् अर्जुनरावणीयं महाकाव्यम्, महाकविहलायुधप्रणीतं विशिष्टधातुप्रयोगप्रधानं कविरहस्यं नाम काव्यम्, आचार्यहेमचन्द्रसूरिणा प्रणीतं स्वीयव्याकरणो– दाहरणपरायणं द्व्याश्रयमहाकाव्यम्, केरलाभिजनेन ब्रह्मदत्तसूनुना नारायणकविना रचितं सुभद्राहरणं महाकाव्यम्, केरलवास्तव्येन वासुदेवकविना प्रणीतं वासुदेवविजयं नाम काव्यम्, केरलकविकुलतिलकेन वैयाकरणवृन्दारकेण नारायणभट्टेन प्रणीतं धातुकाव्यम्, इत्यादीनि व्याकरणोदाहरणकाव्यानि सुविख्यातानि सन्ति।
उदाहरणानां वाक्यगतप्रयोगप्रदर्शनाय शोधप्रबन्धेऽस्मिन् पूर्वनिर्दिष्टानि प्राचीनान्युदाहरणकाव्यानि अपि उपजीव्यत्वेनाश्रितानि। एतदतिरिक्तानि रामायण–महाभारत–मनुस्मृति–रघुवंश–किरातार्जुनीय–

शिशुपालवध–नैषधीयचरित–चम्पूभारत–उदारराघव–अनर्घराघव–दूतांगदादीन्यपि यत्र तत्र प्रयोग– प्रदर्शनाय समुद्धृतानि।
स्पष्टमिदम् अनेन यत् व्याकरणोदाहरणकाव्यानामनुशीलनेन उदाहरणार्थविषये विशेषेण स्पष्टता विशदता च जायते। यतो हि तत्र उदाहरणप्रयोगः विविधरूपेण दृश्यते। एतादृशं प्रयोगविषयं दृष्ट्वा छात्रस्य बुद्धिः विशेषेण विविधप्रयोगेषु प्रसरति। उदाहरणविषयकं ज्ञानं च व्यापकं भवति। एतेन व्याकरणज्ञानमपि सुदृढं जायते।
अतः व्याकरणोदाहरणार्थस्पष्टीकरणविषये पूर्वचर्चितानामुदाहरणकाव्यानां महती उपयोगिता विद्यते। गणपाठस्य तिष्ठद्गुप्रभृतिगणे तिष्ठद्गु, वहद्गु, आयतीगवम्, प्रदक्षिणम् इत्येते शब्दाः निगदिताः। अथैषामर्थो विमृश्यते–

**बृहद्वृत्तौः** तिष्ठन्ति गावो यस्मिन् काले गर्भग्रहणाय दोहाय वाहाय वत्सेभ्यो निवासाय जलपानार्थं वा स कालस्तिष्ठद्गुः। वहन्ति गावो यस्मिन् काले स कालो वहद्गुः। आयन्ति गावो यस्मिन् स काल आयतीगवम्। समत्वं भूमेः समभूमिः। उत्तरपदार्थप्रधान्ये तु समा भूमिः समभूमिः समपदातिरिति कर्मधारय एव। सुषमम्–समा शब्दः संवत्सरवाची। शोभनत्वं समस्य शोभनत्वं समायाः शोभना समा यत्र सुषमम्, एवं विषमम् निषमम्, दुषमम्, अपरसमम्। आयतीसमम्–समाया आयतीत्वम् आयती समा यत्र आयती समेति वा आयतीसमम्। एवं पापसमम् पुण्यसमम्। प्राह्णम्–प्रकृष्टत्वं चाह्नः प्राह्णं निपातनादह्नादेशः। एवं प्ररथम्, प्रमृगम्, प्रदक्षिणम्। कालभाव–लक्षणेऽन्यपदार्थेऽपीत्यन्ये–प्रक्रान्तमहरस्मिन् प्राह्णम्। अन्यत्र प्रगता मृगा अस्मात् प्रमृगो देशः [6]।

**व्याकरणसिद्धान्तसुधानिधौ**–समस्य शोभनत्वं विगतत्वं दुष्टत्वं निर्गतत्वमपगतत्वं चेति विग्रहः [7]।

**तिष्ठद्गु–गणरत्नमहोदधौः** तिष्ठन्ति गावो यस्मिन्काले दोहाय स कालस्तिष्ठद्गु। प्रथमरात्रेरर्धघटी। प्रावृट्काल इत्यन्ये। तिष्ठद्गु यावद् आतिष्ठद्गूच्यते। भाष्योदाहरणात्तावदयं विजातीयः। न च समासमात्रेण न भवितव्यमित्युक्तम्। अभिधानप्रमाणश्च समासः [8]।

**वहद्गु–गणरत्नमहोदधौः** वहन्ति गावो यस्मिन्काले स कालो वहद्गु। शरत्काल इत्यन्ये [9]।

**गणरत्नावल्याम्ः** वहन्ति गावो यत्रेति वहद्गुः, कालविशेषः [10]।

**आयतीगवम्–गणरत्नमहोदधौः** दोहार्थं जलपानार्थं निवासार्थं वायत्यो गावो यत्र काले स आयतीगवम्। यथा आतिष्ठद्गु जपन्सन्ध्यां. [11]।

**गणरत्नावल्याम्ः** आङ्पूर्वादिणः शतरि ङीपि चायती इति रूपम्। तदाद्यं गवमायतीगवम्। विग्रहस्तु आयत्यो गावो यस्मिन्निति आयतीगवम्। सायंकाल इत्यर्थः। अत्र प्रथमासमानाधिकरण्यादप्राप्तः शत्रादेशः, तत्पुरुषाभावादप्राप्तष्टच्। समानाधिकरणे स्त्रीलिंगे गोशब्दे उत्तरपदे प्राप्तस्य पुंवद्भावस्य विरहश्च निपात्यते [12]।

**प्रयोगदीपिकावृत्तौः** आयान्ति गावो वनाद् गोष्ठं यदा स 'आयतीगवम्' कालः=सायंकालः। निपातनेन समासान्तः टच् प्रत्ययोऽत्र। समानाधिकरणे लटः शतृ ङीप्।
आयतीगवमेतस्त्वं प्रतीक्षस्व तु दोहमु [13]।

**भट्टिकाव्येः** आतिष्ठद्गु जपन् सन्ध्यां प्रक्रान्तामायतीगवम्।
प्रातस्तरां पतत्रिभ्यः प्रबुद्धः प्रणमन् रविम् [14]।।
तिष्ठद्गु। आयतीगवम्। आयत्यो दोहाय गोचरादागच्छन्त्यो गावो यस्मिन् काले स काल आयतीगवम्।

**अर्जुनरावणीयेः** दधुर्दृशोऽनुश्रवणान्तमाप्ता भ्रुवोऽनुनेत्रञ्च समागतास्ताः।
तिष्ठद्गुतारा इव कान्तिभाजो वहद्गुपद्मिन्य इवाब्जनेत्राः [15]।।
तिष्ठन्ति गावो यस्मिन् काले दोहाय स तिष्ठद्गुः। प्रदोष इव ताराणां कान्तिः, तद्वदिति। वहद्गुरिति कालविशेषः। वहन्ति गच्छन्ति गावो यस्मिन् काले दोहाय स वहद्गुः, अत्र प्रातः कालो विवक्षितः।

**वासुदेवविजयेः** प्रभविष्णुममुं सदेक्षमाणाः शिशुताच्छद्मविशिष्टरूपधेयम्।
अपजग्मुरितो गृहान्न काश्चित् परितिष्ठद्गु कदापि गोष्ठयोषाः [16]।।
गोष्ठयोषाः काश्चिदपि अमुं सदा ईक्षमाणः परितिष्ठद्गु तिष्ठद्गुकालं वर्जयित्वा कदापि इतो गृहान्नापजग्मुः।

**द्व्याश्रयमहाकाव्येः** अनुस्वाम्यनु नद्यास्ते तिष्ठद्ग्वपि वहद्ग्विव।
युध्यमाना अमन्यन्त धारयन्तः श्रमप्रति [17]।।
तिष्ठन्ति गावो यस्मिन्काले दोहाय वत्सेभ्यो निवासाय जलपानार्थं वा तत् तिष्ठद्ग्वपि सन्ध्याकाल–मन्यन्ताज्ञासिषुः। कीदृशम्। वहन्ति गावो यत्र चरणाय जलपानाय वा तद् वहद्गु इव प्रभातमिव संजातघटिकाद्वयप्रमाणदिनमिव।

**सुभद्राहरणेः** वहद्गु तिष्ठद्गु च याऽन्तरा तां दिनान्तसन्ध्यां गमयन्ति यत्र।
मन्त्रं जपन्तं परमं मुनीन्द्राः परं वहन्तो हृदि देवताञ्च [18]।।
गच्छन्ति गावो गोचराद् गोष्ठं यस्मिन् काले स वहद्गु। तिष्ठन्ति गावो दोहाय गोधग्भिरुत्थापिता यस्मिन् काले स तिष्ठद्गु।
शृंगारप्रकाशे–आयतीगवमागच्छत्यातिष्ठद्गूपतिष्ठते।
निकुच्य कर्णे शार्दूलोऽपोह्य पुच्छी प्रधावति [19]।।

**प्रदक्षिणम्–गणरत्नमहोदधौः** प्रस्तुत्य दक्षिणतो भ्रमति। प्रदक्षिणम्। भोजस्तु प्रदक्षिणं वाममित्याह। प्रकृष्टत्वं दक्षिणाया वा। प्रदक्षिणम [20]।

**गणरत्नावल्याम्ः** प्रस्तुता दक्षिणा दिग् यत्रेति, प्रस्तुतत्वं दक्षिणस्या इति वा प्रदक्षिणम् [21]।

**प्रयोगदीपिकावृत्तौः** युधिष्ठिराश्वमेधे वै सर्वैर्दृष्टं प्रदक्षिणम्। प्रकृष्टाः प्रचुरा दक्षिणा यत्र तत् प्रदक्षिणम् [22]।

**मनुस्मृतौः** प्रदक्षिणं परीत्याग्निं चरेद् भैक्षं यथाविधि [23]।

**रघुवंशेः** प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुररुन्धतीं च [24]।
प्रदक्षिणीकृत्य प्रगतो दक्षिणम्। अप्रदक्षिणं प्रदक्षिणं सम्पद्यमानं कृत्वा प्रदक्षिणीकृत्य सद्भिर्मंगला– चारैरुदग्रतरप्रभावः सन् प्रतस्थे।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ [25]।।
प्रगतो दक्षिणं प्रदक्षिणम्। प्रदक्षिणां याऽर्चिर्ज्वाला तस्या व्याजेन हस्तेनेव तस्मै जयं ददौ।
गणपाठस्य शौण्डादिगणे शौण्ड, धूर्त, अन्तर्, अधि, कुशल, चपल इत्येताः शब्दाः पठिताः। अथैतेषां काव्यगतप्रयोगाः प्रदर्श्यन्ते–

**कातन्त्रपरिशिष्टेः** व्यवहारदाक्षः। आचारकुशलः। कपटप्रवीणः। व्यवहारचतुरः। संग्रामसाहसिकः। ग्रामान्तर इत्यादिराकृतिगणः [26]।

**भाषावृत्तौः** परेऽधि पराधीनः। स्वाधीनः। रणपण्डितः। कार्यनिपुणः। आकृतिगणोऽयम् [27]।

**बृहद्वृत्तौः** पाने प्रसक्तः शौण्डः–पानशौण्डः, पानशौण्डो मद्यपः, अक्षेषु प्रसक्तः शौण्ड इव अक्षशौण्ड, शौण्डशब्द इह गौणो व्यसनिनि वर्तते। वृत्तौ प्रसक्तिक्रियाया अन्तर्भावादप्रयोगः, अक्षधूर्तः, अक्षकितवः। परमार्थतो मद्यपः शौण्ड इत्युच्यते। व्यसनी तु गौणवृत्या [28]।

**प्रक्रियासर्वस्वे:** शास्त्रे शौण्डः शास्त्रशौण्डः। व्याडो दुश्शीलः। गृहव्याडः। गुहासंवीतः, तत्र तिरोहितः। वेदपटुः। शास्त्रपण्डितः। तर्ककुशलः [29]।

**व्याकरणचन्द्रोदये:** वाचि चपलः– वाक्चपलः। वनेऽन्तर् वसति वनान्तर् वसति (वनमध्ये वसतीत्यर्थः) [30]।

**लघुसिद्धान्त–भैमीव्याख्यायाम्:** स्त्रीषु धूर्तः– स्त्रीधूर्तः। संगीते प्रवीणः– संगीतप्रवीणः। शास्त्रे पण्डितः– शास्त्रपण्डितः। तर्के कुशलः– तर्ककुशलः। काव्येषु निपुणः– काव्यनिपुणः। गुहायां संवीत–गुहासंवीतः। गृहे अन्तः–गृहान्तः। ईश्वरे अधि ईश्वराधीनः। राजनि अधि–राजाधीनः [31]।

मनुस्मृतौ– न पाणिपादचपलो न नेत्रचपलोऽनृजुः।
न स्याद्वाक्चपलश्चैव न परद्रोहकर्मधीः।।
नरके हि पतन्त्येते जुह्वन्तः स च यस्य तत्।
तस्याद्वैतानकुशलो होता स्याद्वेदपारगः [32]।।

**कुमारसम्भवे:** परलोकनवप्रवासिनः प्रतिपत्स्ये पदवीमहं तव।
विधिना जन एष वंचितस्त्वदधीनं खलु देहिनां सुखम् [33]।।
त्वयि अधीनं त्वदधीनम्। अधीनशब्दस्य शौण्डादित्वात्समासः।

**भट्टिकाव्ये:** स पुण्यकीर्तिः शतमन्युकल्पो महेन्द्रलोकप्रतिमां समृद्ध्या।
अध्यास्त सर्वर्तुसुखामयोध्यामध्यासितां ब्रह्मभिरिद्धबोधैः [34]।।
सुखयतीति सुखा। सर्वेषु ऋतुशु सुखेति।
वृतस्त्वं पात्रेसमितैः खट्वारूढः प्रमादवान्।
पानशौण्डः श्रियं नेता नात्यन्तीनत्वमुन्मनाः [35]।।
पाने शौण्डो मतः पानशौण्डः इति समासः।

**अर्जुनरावणीये:** अपामरावासमुपागताङ्गं परीन्द्रभु त्राणविधानशौण्डम्।
बहिस्समुद्रं शमिताखिलारिं प्रीतिं प्रियास्तं समवाप्य जग्मुः [37]।।
त्राणविधानशौण्डं रक्षणकरणनिपुणम्।
या स्नानशौण्डान् परलोकसिद्धान् संसारबन्धच्छिदुरान् द्विजातीन्।
अतीरशुष्कांश्च दधार वृक्षाञ्छाखाग्रपक्वं दधतः फलौघम् [38]।।

**अनर्घराघवे–** त्रैलोक्यत्राणशौण्डः सरसिजवसतेर्यः प्रसूतो भुजाभ्याम्
स क्षत्रं नाम वर्णः कुलिशकठिनयोर्यस्य दोष्णोर्विलीनः [39]।
त्रैलोक्यत्राणे शौण्ड इति समासः।

**द्व्याश्रयमहाकाव्ये:** हस्तलाघवतोऽस्येषुरूपं नालक्षि कैरपि।
रणशौण्डस्याक्षधूर्तस्येव कैतवपाशकः [40]।।
अक्षधूर्तस्य प्रवीण द्यूतकारस्य। रणे शौण्डः।

**सुभद्राहरणे:** कान्तिं मासप्रमितशशिनः कान्तिभिस्सादयन्त्यो
जायन्ते यास्सुरतकुशलाः सर्वरात्राभिरामाः [41]।।
वृतं दुःखापेतैरनवरतमर्चद्भिरतिथि–
व्रजं दूरात्प्राप्तं निगमनिपुणैर्यज्ञकुशलैः [42]।।

**वासुदेवविजये:** पुरुषं यमुशन्ति पंचविंशं कृतिनोऽनश्वरमाद्यमात्मजस्य।
उदयार्थममुष्य तां पिताऽपद् वरिवस्याकुशलैः सहात्मवर्ग्यैः [43]।।
एवंकृत्वा यदि गणपाठस्य पदार्थानां विवेचनं भवति, तेन यदि क्वचित् ग्रन्थान्तरेषु पदार्थे वैमत्यं प्राप्यते चेत् तस्य निर्देशपुरस्सरं समीक्षणमपि जायते। बहुत्र तु पदार्थप्रयोगान् अवलम्ब्यैव विवेचनो भवति। यत्र च प्रयोगे मतभेदो दृश्यते तस्य निर्देशपुरस्सरं समीक्षा अपि भवति। अतः उदाहरणकाव्यानामुपयोगिता गणपाठगतशब्दानामर्थज्ञाने महत्त्वपूर्णस्थानं भजते।

**संदर्भ ग्रंथ**


1. महा. प्रथमभागः, पृ.–2 पूना
2. उदाहरणसमापनं प्रयोजनमस्येति उदाहरणसमापनीयम्, समापनात् सपूर्वपदात् (5.1.112) इति छप्रत्ययः।
3. महा.–1.1.56
4. अष्टा.–2.1.10
5. महाभाष्यम्– पस्पशाह्निकम्
6. बृहद्.–3.1.36
7. व्या.सि.सुधा.–2.1.17
8. गण.म.पृ.–132
9. गण.म.पृ.–133
10. गणरत्ना.पृ.–43
11. गण.म.पृ.–135
12. गणरत्ना.पृ.–43
13. प्र.दी.–2.1.17
14. भट्टि.–4.14
15. अर्जुन.–4.8
16. वासु..–4.17
17. द्व्या.–5.38
18. सुभद्रा.–10.11
19. श्रृंगार.–2.51, द्वि. प्रातिपदिकप्रकाशः 51
20. गण.म.पृ.–134
21. गणरत्ना.पृ.–44
22. प्र.दी.–2.1.17
23. मनु.–2.23
24. रघु.–2.71
25. रघु.–4.25
26. का.परि.द्वितीयोभागः–परि.–2, सूत्र.–97
27. भा.वृ.–2.1.40
28. बृहद्.–3.1.88
29. प्र.सर्व.–2131
30. व्या. चन्द्र.–प्रथमखण्डः.,पृ–99
31. ल.सि.भै.व्या.–चतुर्थः भागः, समासप्रकरणम्–पृ.–91
32. मनु.–4.177, 11.37
33. कुमार.–4.10
34. भट्टि.–1.5
35. भट्टि.–5.10
36. अर्जुन.–4.6
37. अर्जुन.–4.29
38. अनर्घ.–4.37
39. द्व्या .–5.72
40. सुभद्रा.–10.15
41. सुभद्रा.–10.18
42. वासु.–4.49